## लिङर्थे लेट्। (७/३४२४)

छन्दसि अन्यतरस्याम् इति वर्तते। लिङर्थे, यत्र लिङ [1]विधीयते विध्यादिः, 'हेतुहेतुमतोर्लिङ' (३.३.१५६/२८१३) इत्येवमादिः,[2] तत्र छन्दसि विषयेऽन्यतरस्यां लेट् प्रत्ययो भवति। 'जोषिषत्' (ऋ. २.३५.१) 'तारिषत्' (ऋ. १.२५.१२)। मन्दिषत्। 'नेता इन्द्रो नेषत्' (शां. श्रौ. ७.९.१)। [3]तक्षिषत्। 'पताति [4]दिद्युत्' (ऋ. ७.२५.१)। '[5]प्रजापतिरुदधिं च्यावयाति' (तै. ३.५.५.२)॥

## उपसंवादाशङ्कयोश्च। (८/३४३१)

उपसंवादः परिभाषणम्, कर्तव्ये पणबन्धः, यदि मे भवान् इदं कुर्याद् [6]अहमपि [7]भवते इदं दास्यामि इति। कारणतः कार्यानुसरणं [8]तर्कः, उत्प्रेक्षा, आशङ्का। उपसंवादे आशङ्कायां च गम्यमानायां छन्दसि विषये लेट् प्रत्ययो भवति। उपसंवादे – 'अहमेव पशूनामीशै' (काठक. सं. २५.१)। '[9]मदग्रा एव [10]वो ग्रहा [11]गृह्यान्तै (मै. ४.५.८) इति। 'मद्देवत्यान्येव वः पात्राण्युच्यान्तै' (तै.सं. ६.४.७.१)। आशङ्कायाम् च – '[12]नेज्जिह्मायन्त्यो नरकं पताम' (ऋ. खि. १०.१०६.१)। जिह्माचरणेन नरकपातः आशङ्क्यते। लिङर्थ एवायम्, नित्यार्थं तु वचनम्। पूर्वसूत्रे [13]अन्यतरस्याम् इति वर्तते॥

## तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः। (९/३४३६)

छन्दसि इत्येव। तुमुनोऽर्थस्तुमर्थः। तत्र छन्दसि विषये धातोः [14]सयादयः प्रत्यया भवन्ति। तुमर्थो भावः। कथं ज्ञायते? वचनसामर्थ्यात् तावदयं कर्तुरपकृष्यते। न चायमन्यस्मिन्नर्थे तुमुन्[15]आदिश्यते। अनिर्दिष्टार्थाश्च प्रत्ययाः [16]स्वार्थे भवन्ति (प. १२२)। स्वार्थश्च धातूनां भाव एव। से – [17]वक्षे रायः। सेन् – 'ता वामेषे रथानाम्' (ऋ. ५. ५६. ३)। असे, असेन् – 'क्रत्वे दक्षाय जीवसे' (अ. ६. १९. २)। स्वरे विशेषः। क्से – 'प्रेषे भगाय' (तै.सं. १.२.११.१) कसेन् – 'श्रियसे' (ऋ. ५.५९.३)। अध्यै, अध्यैन् – '[18]काममुपाचरध्यै' (तै. सं. १.२.११.१)। स्वरे विशेषः। कध्यै – 'इन्द्राग्नी आहुवध्यै' (वा.सं.३.१३)। कध्यैन् – श्रियध्यै। शध्यै, शध्यैन् – 'वायवे पिबध्यै' (ऋ. ७.९२.२)। 'राधसः सह मादयध्यै' (वा. सं. ३.१३)। तवै – 'सोममिन्द्राय पातवै' (ऋ. ८. ६९. १०)। तवेङ् – 'दशमे मासि सूतवे' (ऋ. १०. १८४. ३)। तवेन् – [19]स्वर्देवेषु गन्तवे (अ. ९.५.१७)। '[20]कर्तवे' (ऋ. ९.८६.२०)। हर्तवे॥

## प्रयै रोहिष्यै अव्यथिष्यै। (१०/३४३७)

तुमर्थे छन्दसि इत्येव। प्रयै रोहिष्यै अव्यथिष्यै इत्येते [21]शब्दा निपात्यन्ते छन्दसि विषये। प्रपूर्वस्य यातेः कैप्रत्ययः – 'प्रयै देवेभ्यः[22]' (ऋ. १.१४२.६)। प्रयातुम्। रुहेः इष्यैप्रत्ययः – '[23]अपामोषधीनां रोहिष्यै' (तै. सं. १.३.१०.२)। रोहणाय। व्यथेर्नञ्पूर्वस्य इष्यैप्रत्ययः – 'अव्यथिष्यै' (काठ. सं. ३.७)। अव्यथनाय॥

---

1. विधीयते नास्ति फ. 2. च इत्यधिकम् अ. क. 3. नास्ति फ. 4. विद्युत् मुद्रितः पाठः. क. 5. च्यावयाति फ. 6. ततो इत्यधिकम् फ. 7. भवते नास्ति फ. 8. तद् ह. 9. मदघ्ना ब. 10. यो फ. 11. गृह्यन्ते क. 12. याने ह. 13. हि इत्यधिकम् ह. 14. से आदयः फ. 15. निर्दिश्यते फ. 16 स्वार्थे नास्ति फ. 17. वक्रे रायः ह, पक्षे रायः बालमनोरमा. 18. कर्मण्युपाचरध्यै मुद्रितः पाठ. 19. वसु देवेषु अ. ब. क. फ, सुवर्देवेषु गन्तवे ह. 20. कर्तवे हर्तवे नास्ति फ. 21. शब्दाः नास्ति फ. 22. हविः इत्यधिकम् ब. 23. अहमेधीनां अ.